दिनाङ्क :-18.03.2025

प्रात: - 06:55

प्रधानमन्त्रि-नरेन्द्रमोदी

भारत-न्यूज़ीलैण्डदेशौ रक्षा-शिक्षा-क्रीडौद्यानिकी-वनविज्ञानसहितेषु पञ्चसन्धिषु हस्ताक्षरं कृतवन्तौ। उभावपि पक्षौ अधिकृतार्थिक-परिचालनपरक-पारस्परिकमान्यतासन्धीनामपि आदान-प्रदानं विहितवन्तौ। उभौ देशौ मुक्तव्यापारसन्धिमाश्रित्य सहैव विशेषज्ञ-कुशलश्रमिकाणाञ्च कुशल-गतिशीलतां सौविध्ययुताञ्च विधातुं वार्तोपक्रमं समुद्घोषितवन्तौ। न्यूजीलैण्डदेशः हिन्दप्रशान्त-महासागराणां संकल्पोपक्रमे सम्मिलितः। प्रधानमन्त्रिणा नरेन्द्रमोदिना ह्यः नवदेहल्यां न्यूजीलैण्ड्-देशस्य स्वसमकक्षेण क्रिस्टोफर् लक्सन् इत्यनेन सह वार्तालापः साधितः। चर्चायामस्यां भारत-न्यूजीलैण्ड् देशयो: सम्बन्धस्य विभिन्नाः पक्षाः सम्मिलिताः आसन्। स्ववक्तव्ये, श्री मोदी अवदत् यत्, असौ द्विपाक्षिक-सम्बन्धस्य विभिन्नेषु विषयेषु विस्तृतचर्चां कृतवान्, अपि च उभौ पक्षौ रक्षा-सुरक्षयो: सहभागितां सुदृढं संस्थागतं च कर्तुं निर्णयम् अकुरुताम् । श्रीमोदी उक्तवान् यत् संयुक्त-अभ्यासैः, प्रशिक्षणैः, नौकाश्रय-भ्रमणैश्च सह रक्षा-उद्योगक्षेत्रे अपि परस्परसहयोगाय अनेन मार्ग: सज्जीभविष्यति ।

आतंकवादस्य, पृथकतावादीनां, चरमपन्थी-तत्त्वानां विरुद्धं भारत-न्यूजीलैण्ड्-देशयोः सहकारः निरन्तरं भविष्यति इति प्रधानमन्त्री अवदत्।

प्रधानमन्त्री- रायसीनासंवादः

प्रधानमन्त्री नरेन्द्रमोदी तस्य च न्यूजीलैण्डदेशस्य समकक्षः क्रिस्टोफर्-लक्सन – इत्यसौ च संयुक्तरूपेण ह्यः नवदिल्ल्यां रायसीनासंवादस्य दशमसंस्करणस्य उद्घाटनं कृतवन्तौ। स्वभाषणे श्रीलक्सन इत्यसौ अवदत् यत् भारत-न्यूजीलैण्डदेशौ भाग्यवन्तौ स्तः यतोहि उभौ देशौ विश्वस्य आर्थिकदृष्ट्या गतिशीलक्षेत्रस्य भागौ स्तः। न्यूजीलैण्डदेशस्य प्रधानमन्त्री अग्रे अवोचत् यत् रायसीनासंवादः एतादृशो मञ्चो वर्तते यो हि विश्वस्य विचारकेभ्यः हिन्दमहासागरे समकालिक-कार्यनीतिक-समाह्वानेषु स्वसामूहिकमनस्सुकां केन्द्रीकरोतीति। अपि च वार्षिकावसरप्रदानाय एकः मञ्चो विद्यते। अस्य वर्षस्य रायसीना- संवादस्य विषयः अस्ति कालचक्रः जनाः शान्तिः गृहश्चेति।

राजनाथ-तुलसीगबार्ड:

ह्यः नवदिल्ल्यां भारतस्य रक्षा-मन्त्रिणा श्रीराजनाथसिंहेन अमेरिकायाः राष्ट्रीय-गुप्तचर-निदेशिकया तुलसी गबार्ड इत्यनया सहोपवेशनं विहितम् । उपवेशनावधौ उभौ नेतारौ सबलं अङ्गीकृतवन्तौ यत् सामरिक-सुरक्षा उभयोः देशयोः वैश्विक-सामरिक-सहयोगस्य प्रमुखः स्तम्भः वर्तते।

श्रीसिंहेन सुश्री-गबार्ड इत्यनया च भारत-अमेरिका-देशयोः सैन्याभ्यासस्य, सामरिक-सहयोगस्य, सूचना-संवहन-सहयोगस्य सहैव सामुद्रिकक्षेत्रेषु कृतायाः प्रमुखाप्रगतेः समीक्षा कृता।

दिल्लीविधानसभा

दिल्लीविधानसभाद्यारभ्य नवदिल्ल्यां स्व- नवनिर्वाचितेभ्यः सदस्येभ्यः द्विदिवसीयस्य कार्यक्रमस्य आयोजनं करिष्यति। अस्य कार्यक्रमस्योद्घाटनं लोकसभाध्यक्षः ओम्-बिरला इत्यसौ विधास्यति। कार्यक्रमस्यास्य प्रयोजनम् विधायकेभ्यः संसदीय-प्रक्रियानाम् आचारसंहितायाः सर्वोत्तमशासनागतप्रथानां च ज्ञानप्रदानमिति वर्तते। उद्घाटनसत्रे दिल्ली विधानसभाध्यक्षः विजेन्द्रगुप्ता उपाध्यक्षः मोहनसिंहबिष्टः दिल्ल्याः मुख्यमन्त्री रेखागुप्ता विपक्षदलीया नेत्री आतिशी अथ च अनेके गणमान्यजनाः उपस्थिताः भविष्यन्ति।

कबड्डी-विश्वचषकः

कबड्डी-विश्वचषक- प्रतिस्पर्धा ह्यः सायंकाले ब्रिटेनदेशे समारब्धा। भारतेन वॉल्वरहैम्पटन नगरे पुरुषवर्षीये द्वन्द्वे इटलीदलं चतुःषष्टि द्वाविंशति इत्येतैः अङ्कैः पराजित्य अनेन विजयेन सह अस्याः प्रतियोगितायाः शुभारम्भः कृतः। महिलावर्गे अद्य भारतस्य वेल्सइत्यनेन दलेन साकं भारतीयसमयानुसारं सार्धं पञ्चवादने वॉल्वरहैम्पटन इत्यत्र सामुख्यं भविष्यति।

## बैंक सुविधाः

अस्मिन् वर्षे मार्च-मासस्य एक त्रिंशद्दिनाङ्के सार्वजनिक-अवकाश दिनं भवति चेदपि करदातृभ्यः सौविध्यं प्रदातुं सर्वाः बैङ्क्- सेवाः व्यवहारार्थं उद्घाटिताः भविष्यन्ति। एकस्याम् अधिसूचनायां, रिजर्व्-बैङ्क् इत्ययम् अवदत् यत् सर्वकारस्य लेखाकरणं सुगम्यं कर्तुं सम्पूर्णे देशे विशेष-समाशोधन-कार्याणि कर्तुम् आवश्यक-व्यवस्था कृता अस्ति इति।